संजय उवाच ।

sañjaya uvāca |

एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ।

दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ११.९ ॥

evamuktvā tato rājanmahāyogeśvaro hariḥ |
darśayāmāsa pārthāya paramaṁ rūpamaiśvaram || 11.9||

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।

अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ ११.१० ॥

anekavaktranayanamanekādbhutadarśanam |
anekadivyābharaṇaṁ divyānekodyatāyudham || 11.10||

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।

सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥ ११.११ ॥

divyamālyāmbaradharaṁ divyagandhānulepanam |
sarvāścaryamayaṁ devamanantaṁ viśvatomukham || 11.11||

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।

यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ ११.१२ ॥

divi sūryasahasrasya bhavedyugapadutthitā |
yadi bhāḥ sadṛśī sā syādbhāsastasya mahātmanaḥ || 11.12||

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।

अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ ११.१३ ॥

tatraikasthaṁ jagatkṛtsnaṁ pravibhaktamanekadhā |
apaśyaddevadevasya śarīre pāṇḍavastadā || 11.13||

ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ।

प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥ ११.१४ ॥

tataḥ sa vismayāviṣṭo hṛṣṭaromā dhanañjayaḥ |
praṇamya śirasā devaṁ kṛtāñjalirabhāṣata || 11.14||